# नेपाल संस्कृत विश्वविद्यालय
# Nepal Sanskrit University

शिक्षाध्यक्षको कार्यालय
Office of the Rector

बेलझुण्डी दाङ
Beljhundi, Dang

प.सं:-
च.नं:-

मिति:- २०८३।०६।२१

## नेपालसंस्कृतविश्वविद्यालयगानरचनार्थं विशेषाह्वानम्

प्राच्यवाङ्मयसंरक्षणपुरस्सरं तन्निहितज्ञानविज्ञानानि प्रकाशयितुं नेपालराष्ट्रं संस्कृतविद्यायाः वैश्विकं केन्द्रं विधातुञ्च संस्थापितस्य नेपालसंस्कृतविश्वविद्यालयस्य महत्त्वगौरवादिप्रकाशनपरं संस्कृतभाषानिबद्धं विश्वविद्यालयगानं निर्माय तस्य विशेषावसरगेयत्वं प्रतिष्ठापयितुं नेपालसंस्कृतविश्वविद्यालयेन निर्णीतमस्तीति सहर्षं विज्ञापयामः । एतदर्थं नेपालसंस्कृतविश्वविद्यालये विश्वविद्यालयान्तरेषु राष्ट्रस्यान्येषु क्षेत्रेषु च कार्यरताः सुरभारतीसमुपासकाः सुकवित्वगुणगणविशिष्टाः अत्र भवन्तः नेपालसंस्कृतविश्वविद्यालयस्य संस्कृतगानरचनार्थं सादरं सविनयञ्च आहूयन्ते, सम्प्रार्थ्यन्ते च । स्पर्धायां प्राध्यापकाः साहित्यकाराः, बुद्धिजीविनः, विद्यार्थिनः, स्पृहयालवः अन्येऽपि महानुभावा भागं ग्रहीतुं प्रभवन्तीति च सादरं निवेदयामः । गानं अधोनिर्दिष्टां सरणिमवलम्ब्य सुललितया मधुरया च गिरा रचयित्वा ईमेलाख्यसञ्जालमाध्यमेन सम्प्रेषणीयमिति संसूचयामः । संस्कृतविश्वविद्यालयगानरचनाविधौ वक्ष्यमाणविषयाः सविशेषं विचारणीया भविष्यन्ति -

१.विश्वविद्यालयस्थापनसम्बद्धप्रस्तावनायां निहितान् विषयानधिकृत्य विश्वविद्यालयगानं संस्कृतभाषायां रचनीयम् ।
विश्वविद्यालयसंस्थापनायाः प्रस्तावना -
नेपालमा संस्कृत शिक्षालाई उच्चतम तहसम्म सुव्यवस्थित गर्न, संस्कृत विद्याले विविध क्षेत्रमा प्राप्त गर्दै आएका विशेष उपलब्धिहरुलाई समयानुसार अध्ययन, अनुसन्धान, संरक्षण र संवर्धन गर्न, परम्परागत धर्म र नैतिक मान्यता, सदाचार र सच्चरित्रताको परिपालन गर्दै नेपाल राज्यलाई संस्कृत विद्याको ज्ञान र प्रेरणा प्राप्त गर्ने केन्द्रका रूपमा विकास गर्न र नेपाल राज्यमा अतिप्राचीनकालदेखि नै संस्कृत विद्याको गौरवमय परम्परा रहँदै आएको र त्यसलाई निरन्तरता दिनका लागि एक विश्वविद्यालय स्थापना गर्न वाञ्छनीय भएकाले प्रतिनिधि सभाको घोषणा २०४३ जारी भएको पहिलो वर्षमा प्रतिनिधि सभाले यो ऐन बनाएको छ ।

२.प्रस्ताविते गाने वैदिकवाङ्मये प्रथितस्य वैश्विकभावस्य, समानतायाः, एकत्वस्य, विश्वबन्धुत्वस्य च सन्देशः समाहितःस्यात् ।

३.नेमुनेरारभ्य लिच्छवि-मल्ल-शाहाधुनिक-कालखण्डानां गौरवमचया गुरुकुलपरम्परायाः संस्कृतेः सभ्यतायाश्च सन्निवेशःकार्यः ।

४.हिमालय-पर्वत-तराईनामभिर्विभक्तानां भूभागानां तत्रत्यानां प्राकृतिकवैभवानां गण्डकी-कौशिकी-कर्णालीति प्रथितानां नदीनां तासां प्रस्रवणक्षेत्राणां राराफेवागोसाइँप्रभृतीनां सरसां मुक्ति-रुरु-वराह-मिथिला-लुम्बिनी-पाशुपतादिक्षेत्राणाञ्च वैशिष्ट्यानि प्रस्तुतानि भवेयुः ।

५.वेदवेदाङ्गादीनामष्टादशविद्यानाम्, चतुःषष्टिकलानाञ्च संरक्षणे संस्कृतविश्वविद्यालयेन कृतानि योगदानानि निर्दिष्टानि भवेयुः ।

६. विश्वविद्यालयसंस्थापनायाः प्रेरणापुरुषस्य राष्ट्रगुरोर्योगिनो नरहरिनाथस्य, दाङ्गस्थानां तथान्यस्थानस्थितानां दानवीराणाम्, सज्जनानां संस्कृतानुरागिणाञ्चावदानं सङ्केतितं भवेत् ।

७. गानं शतशब्दाभ्यन्तरे स्थित्वा विरचितम्, ध्रुवपदे संस्थाप्य गायनयोग्यञ्च स्यात् ।

082-400034 rectoroffice@nsu.edu.np www.nsu.edu.np

८. विरचितगाने लिङ्ग-जाति-क्षेत्र-वर्ग-वर्ण-सम्प्रदायादिसम्बद्धा विभेदकाररिणो विचारा अभिव्यक्ता न भवेयुः ।

९. गानसम्प्रेषणस्य वैद्युतपत्राचारसङ्केतः retoroffice@nsu.edu.np इत्यस्ति ।

१०. गानसम्प्रेषणावधिः कार्तिकमासस्य पञ्चदशदिनाङ्कपर्यन्तम् (२०८३/७/१५) अस्ति ।

११. स्पर्धायै सम्प्रेषितानां गानानां विशिष्टविदुषां मूल्याङ्कनसमितेर्माध्यमेन मूल्याङ्कनं विधाय समुत्कृष्टानि त्रीणि गानानि चेष्यन्ते, तेषां रचयितारः समुचितपारितोषिकेण पुरस्करिष्यन्ते, अपि च तेषु सर्वोत्कृष्टं गानं विश्वविद्यालयगानरूपेण निर्धारयिष्यते ।

आज्ञया

गिरिराजशर्मा
शैक्षिकप्रशासनमहाशाखाप्रमुखः
महाशाखा प्रमुख